## वित्तो भोगप्रत्यययोः । (५८/३०४१)

वित्तः इति विदेर्लाभार्थात् (धा.पा. १४३३) उत्तरस्य क्तस्य नत्वाभावो निपात्यते भोगे प्रत्यये चाभिधेये । [1]वित्तमस्य बहु । धनमस्य बहु इत्यर्थः । धनं हि भुज्यते इति [2]भोगोऽभिधीयते । प्रत्यये – वित्तोऽयं मनुष्यः । प्रतीतः इत्यर्थः । प्रतीयते इति प्रत्ययः । भोगप्रत्यययोः इति किम् ? विन्नः ॥

## भित्तं शकलम् । (५९/३०४२)

भित्तम् इति निपात्यते शकलं चेत् तद्भवति । भित्तं तिष्ठति । भित्तं प्रपतति । शकलपर्यायोऽयम् । अत्र भिदिक्रिया शब्दव्युत्पत्तेरेव निमित्तम् । भिदिक्रियाविवक्षायां हि शकलविषये भिन्नम् भित्तम् इत्येव भवति ॥

## ऋणमाधमर्ण्ये । (६०/३०४३)

ऋणम् इति ऋ इत्येतस्माद् धातोरुत्तरस्य निष्ठातकारस्य नकारो निपात्यते [3]आधमर्ण्यविषये[4] । अधमः ऋणे अधमर्णः, एतस्मादेव निपातनात् [5]सप्तम्यन्तेन उत्तरपदेन समासः, [6]तद्भावः आधमर्ण्यम् । यद्येवम्, [7]उत्तमर्णः इति न सिध्यति ? नैष दोषः । कालान्तरदेयविनिमयोपलक्षणार्थं चेदमुपात्तम् । तेन उत्तमर्णः इत्यपि[8] हि भवति । ऋणं ददाति । ऋणं धारयति । आधमर्ण्ये इति किम् ? ऋतं वक्ष्यामि नानृतम् ॥

## नसत्तनिषत्तानुत्तप्रतूर्तसूर्तगूर्तानि छन्दसि । (६१/३६०३)

नसत्त निषत्त अनुत्त प्रतूर्त सूर्त गूर्त इत्येतानि छन्दसि विषये निपात्यन्ते । नसत्त, निषत्त इति सदेः नञ्पूर्वात् निपूर्वाच्च नत्वाभावो निपात्यते । नसत्तमञ्जसा । नसन्नम् इति भाषायाम् । '[9]निषत्तः' (ऋ. १.५८.३) । निषण्णः इति भाषायाम् । अनुत्तम् इति उन्देः नञ्पूर्वस्य निपातनम् । '[10]अनुत्तमा ते मघवन्' (ऋ. १.१६५.९) । अनुन्नम् इति भाषायाम् । प्रतूर्तम् इति त्वरतेः, तुर्वी इत्येतस्य वा निपातनम् । 'प्रतूर्तं वाजिन्' (तै. ४.१.२.१) । प्रतूर्णम् इति भाषायाम् । सूर्तम् इति सृ इत्येतस्य उत्वं निपात्यते । [11]सूर्ता गावः । सृता गावः इति भाषायाम् । गूर्तम् इति गूरी इत्येतस्य नत्वाभावो निपात्यते । [12]'गूर्ता अमृतस्य' (वा. सं. ६.३४) । गूर्णम् इति भाषायाम् ॥

---

1. अपरिमितं वित्तमस्य ह. 2. प्रायोऽमिधीयते इ. 3. आधमर्ण्ये विषये ब. 4. परद्रव्यं यो वृद्धया
गृह्णाति अधमर्णः इत्यधिकम् इ. 5. सप्तम्यन्तोत्तरपदसमासः ब.क.इ. 6. तस्य भावः ड. 7. उत्तमर्णविषये ड.म
8. अपि नास्ति क. 9. रजस्या निषत्ताः (मै. 4.10.6). 10. अनुत्तमं ते नववनम क. 11. प्रसूर्ता वय
इ.ब.ड.क. 12. गावो गूर्त्ता अमृतस्य पत्नी ड.